ह

स्त्वं० १ श्रीमतेरामानुजायनमः अखिलभुवनवंताशभेदः स्वाश्रितानां अगुणितगुणकोशोहेयगंधाभिभावी चिद
चिदधिपतिर्योरंगभूमिस्थआद्यः विलसतु मम चित्ते श्रीनिवासो मुकुंदः १ श्रीमन्नारायणस्वामिन्नहं शेषः
स्वतस्तवस्वाभाविकःश्रुतावुक्तस्त्वं चशेषीममापिहि २ रक्ष्योरक्षकस्त्वं वा अहं पुत्रो भवान्पिता भर्तव्योहं
भवान्भर्ता त्वं सेव्योहं तु सेवक ३ सेव्यसेवकसंबंधो निरुपाधिक एव सः आधेयोहं त्वमाधारः स्वमहं स्वाम्य
सि स्वयं ४ अहं ज्ञाता भवान्ज्ञेयो हं त्वद्रूपो भवान्वशी अहमात्मा भवानात्मा त्वम शीवयं शक्ताः ५ वयं भो मं
1 ग्याभवान्भोक्ताहमणस्त्वं विभुः स्वतः वयं शरीरभूतास्ते त्वं शरीरी श्रुतौ मतः ६ नेताहत्व हिनेतव्योनिकृ
ष्टोहं त्वमुत्तमः दोषाकरा वयं विष्णो त्वं तु दिव्यगुणाकरः ७ भवान्परोमेभैव न्नहंप्रत्यवरखलु परमात्मा ग
र्मला हं त्वमीशोऽनीशाता मयि ८ न त्वंन इदमात्मा वा आसीत्तत्त्वमसि ध्रुवं इत्यादिश्रुतिवाक्यानि वदंत्यैक्यं स्वरू
पतः ९ आवयोर्नेह नानेति श्रुत्या भेदो निषिध्यते इति चेत्सत्य मुक्तं तत्र विरोधोत्र विद्यते १० दराक्षेरावी
शते यो देव एक इतिश्रुते पिताहमस्य जगतो माता धाता पितामहः ११ गतिर्भर्ताप्रभुःसाक्षीतिगीतायांनिश्चि
तं त्वया तदालोच्य मयाप्युक्तं न तु स्वोत्प्रेक्षया क्वचित् १२ आत्मत्वं मे स्वभावेन ह्यण त्वं तु स्वरूपतः स्वरूपे त्रया०
ण स्वभावाच्च त्वमात्मेति श्रुतिर्जगौ १३ परमात्मा परब्रह्म परमेश अतः प्रभो श्रु [illegible] तिस्मृतीतिहासेषु २
गीयते वेदपारगैः १४ संबंधा आवयोरेते श्रुत्युक्ता निरुपाधिकाः त्वं प्रकारी प्रकारोहमेवमैक्यमपीष्यते १५
एवमेव तथा लोके दृश्यते नीलमुत्पलं प्रकारस्यापृथक्सिद्धेरैक्यं न तु स्वरूपतः १६ अणवो विभवो वैशादृश्या

श्रीमतेरामानुजायनमः॥ श्रीमतेरामानुजायनमः॥ अखिलभुवनपेनाशर्मदः स्वाश्रितानां अ
गुणितगुणकोशोद्देपगंधाभिभावी चिदचिदधिपतिर्यो रंगभूमिस्थ आद्यः विलसतु मम
चित्ते श्रीनिवासो मुकुन्दः १ श्रीमन्नारायणस्वामिन्नहं शेषः स्वतस्तव स्वाभाविकः श्रुतावुक्तस्त्वचशेषी
ममापिहि २ रक्ष्योहं रक्षकस्त्वं वाहं पुत्रो भवान् पिता भर्त्त्योहं भवान्भर्तात्वं सेव्योहं तु सेवकः ३ अहं ज्ञा
ताभवान् ज्ञेयोहं त्वद्दृशेषा भवान् वशी अहमात्मा भवानात्मा त्वमेशी वयमेशकाः ४

काकचेष्टा वकध्यानं श्वाननिद्रा तथैव च स्त्रीत्यागी विद्यार्थि पंचलक्षणं २
अल्पहारि

श्यभोगमभजं दुःसहं नरकादिषु विज्ञातवान्नकपटं भूतादिकृतमंजसा ३३ त्वन्मायावशगो भूत्वा कैंकर्यं ज्ञात
वान्न तैं यथाकृदुशितापानं पित्तरोगवशाद्धरे ३४ विचित्रकार्यजननी साप्यचिंत्या श्रुता मया त्वच्छक्ति
भूता प्रकृतिर्येया विश्वं विर्मिहितं ३५ नित्या हि प्रकृतिः श्रीमन्नानित्यं कार्यमुच्यते अक्षरे लीयते व्यक्तं प्रधा
नेक्षरमित्यपि ३६ अनाद्यंतवती सा गौरजामेकामिति श्रुतेः द्वेरा क्षरस्वभावा सा नित्या सततविक्रिया ३७
प्रकृतिं पुरुषं चैव विद्ध्यनादी इति स्मृतेः जीवात्मानोपि नित्या वै नित्यानामिति च श्रुतेः ३८ अजो नित्यः शा
श्वतोयमित्यात्मा नित्य एव सः चिदचिद्युक्तं कूटस्थैव जगत्कारणमुच्यते ३९ स्वरूपतः स्वभावाच्च निर्विकारो
हरिः स्मृतः स्वभावतो विकारित्वं जीवे चितः स्वरूपतः ४० लोकं वैकुंठनामानं दिव्यं त्रिगुणवर्जितं अप्राकृतं शाश्व
तं दिव्यमनंतं परमं पदं ४१ अप्राकृतैः सुरैर्वंद्यं सर्वप्रलयवर्जितं हिरण्मयं मोक्षपदं ब्रह्मानंदसुखावहं ४२ अज र
डं स्वप्रकाशं तद्दुर्लक्षीणां सुदुर्लभं त्रिपाद्विभूत्ययोध्यादिशब्दवाच्यं महाद्भुतं ४३ एवमादिगुणोपेतं तद्विष्णोः प
रमं पदं कदाहं द्रक्ष्यामहे विष्णो नित्यसिद्धैश्च सेवितं ४४ कामान्नीकामरूपः सन्निमान्लोकान्स्वतंत्रतः कदाहं
विहरिष्यामि श्रीहरे कृपया तव ४५ छत्रं वा चामरं वापि पादुके वा पतद्ग्रहं गृहीत्वानुचरिष्यामि रंगनाथ मा
कृपाकर ४६ एवं कुर्विति लक्ष्मीश कदा मामाज्ञापयिष्यसि कदा परिचरिष्यामि भवंतं श्रीहरे मुदा ४७ कदा त्व
पदपद्माभ्यां मम शिरो मंडयिष्यसि कृतार्थो हं भविष्यामि कदा त्वत्कृपया विभो ४८ ननु दोषाकराणां तद्दुर्ग त्
मं परमं पदं ईदृशो हि कथं तादृक् पदं प्रार्थये स्वयं ४९ इति चेत्सत्यमुक्तं तत्तादृशो प्यहमीश्वर त्वमेव शे त्रया २

दीशानीशावितिश्रुतेः मणुत्वे विभुद्वयोरेकदापि नैकतां व्रजेत् १७ तत्त्वमस्यादिवाक्यानिमां ब्रुवंति त्वदात्मके आ
त्मैव तदिदं विश्वं त्वदात्मकमिदं जगत् १८ सहस्रादिवचनैस्त्वं निश्चितः परमर्षिभिः नारायणः एको वा इ
त्यादि श्रुतिमानतः १९ आत्मात्वं सर्वजगतः सआत्मेतिश्रुतेर्यतः आवयोरंतरं श्रीमन्नेवं पूर्वोक्तहे
तुभिः २० इत्यादिषु प्रसिद्धं वै निरूपाधिकमेव तत् तस्मान्नाथस्त्वमस्माकं नाथवंतो वयं प्रभो २१
स्वरूपेणापि भेदस्याप्युद्देशेन त्वभेदवान् अनेन भेदवादेन वहवः परिवंचिताः २२ नजानंतीदृशं
भेदं कुतर्कैर्दुष्टमानसाः निरीश्वरा निरारंभा नानावादरता हरे २३ अनाद्यविद्ययाव्याप्तहृदया
दंभिका जैनाः श्रुत्यर्थविपरीतज्ञा जगन्मिथ्यात्ववादिनः २४ अनन्यसमराजानं यावत्त्वां न स
मागताः अनेकचित्तविभ्रांता भवद्दासपराङ्मुखाः २५ त्वं समस्त्वमसि श्रीमन्नत्वत्परः कोपि
नापरः न तत्समश्चाभ्यधिकस्त्वामेवं श्रुतिरब्रवीत् २६ मादृशास्ते हरे संति वहवोपि हि सेवकाः
ममसर्वार्थसंपन्नो नान्यो नाथ परः ईदृशः २७ मया विश्वेश्वरः स्वामी सेवकेन ससेव्यते एतावान् भेद
वादोस्मादभेदादुररीकृत २८ एतस्मादितरद्भेदं नाहं कर्तुमिहक्षमाः एषभेदः पुराचेन्मे समभूत्तव
दूषितः २९ तत्कथं मुक्तिनामापिगः ह्लीपासत्तिभीतिमा र अज्ञानमिदमेवात्र शे
षीयन्नावत्नक्ष्यते ३० स्वचित्तनित्ययोग्यत्वं हृदिस्थ्नापि समा स्थितः भूतादिनानोदितोहमसत्तः
परितुष्टये ३१ स्वस्य पराभवं कृत्वा हृदयो भूवं निरंतरं एवमेवादरं कृत्वा परे स्वविपरीतधीः ३२ तदु

त॰ ३ षभूतं मां परया कृपया नय ५० नन्वेवं सर्वएवात्र शेषभूता ममैव हि विषमः स्यामहं तर्हि त्वदेकोद्धरणे ह्यतः ५१
इति चेत्तत्तवापेक्ष्यं व्याजमात्रं समापते शरणं तव पादाब्जे ममेति स्वीकुरु प्रभो ५२ एवं चेद्विषमो न स्या
कृपा निर्हेतुकी च ते यत्किंचिद्व्याजमात्रं तु न हेतुः क्वचिदुच्यते ५३ वात्सल्यादिगुणा व्यर्था भवेयुरन्य
था विभो विषयात्लाभतस्तस्मा कुरु स्वार्थं न ममोपरि ५४ विवादो नादिकालीनस्त्वमेहं मे इतीदृशः
तव शेषत्वज्ञानान्मे नष्टो ह्याचार्यवत्तया ५५ एवं मनोरथं कुर्वन्निह कालं नयेद्बुधः सुखदुःखसहि
ष्णुः स्यात्स्वारब्धे स्वं परीक्षयेत ५६ तत्वत्रयमिदं ह्येयं परस्परविलक्षणं श्रुतिस्मृतीतिहासेभ्यो न
3 वनीतमिवोद्धृतं ५७ सर्ववेदांतसारार्थं निर्णीतं परमर्षिभिः भोज्यसंसृतिभीरूणां भवपाशविमो
चनं ५८ ऋते ज्ञानान्न मुक्तिः स्यादिति श्रुत्यावधारितं कीदृग्ज्ञानं तदित्यत्र प्रमाणं श्रुतिरेव हि ५९
भोक्ता भोज्यं प्रेरितारं चेति तत्वत्रयात्मकं यज्ज्ञानं तद्धि नानास्ति मोक्षो हीति श्रुतेर्मतं ६० चिदचिद्विशि
ष्टमेकं तत्वं ब्रह्मैव वेद्यते एतत्सदानुसंधेयमीप्राणं तं मुमुक्षुभिः ६१ श्रीमन्नारायणः साक्षाद्धार्द्दः स्वी
येषु वत्सलः मृत्युन्यनाड्याप्राणं ते स्वं पदं प्रापयिष्यति ६२ श्रीनिवासांघ्रिदासेन श्रीयतीद्रकृपावशात्
तत्वत्रयानुसंधानमनुभूतं सनातनं ६३ इति श्रीशेषिशेषसंवादरूपं तत्वत्रयानुसंधानं समाप्तं ॥ त्रया ३
संवत् १८६७ ॥

4